श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

# ॥ श्रीकृष्णाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकृष्णाष्टकम् ॥

वसुदेव सुतं देवं कंस चाणूरमर्दनम्।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥ 1 ॥

अतसीपुष्प सङ्काशं हारनूपुर शोभितम्।
रत्नकङ्कण केयूरं कृष्णं वन्दे जगद्गुरुम् ॥ 2 ॥

कुटिलालक संयुक्तं पूर्ण चन्द्रनिभाननम्।
विलसत्कुण्डल धरं कृष्णं वन्दे जगद्गुरुम् ॥ 3 ॥

मन्दार गन्धसंयुक्तं चारुहासं चतुर्भुजम्।
बर्हि पिञ्छाव चूडाङ्गं कृष्णं वन्दे जगद्गुरुम् ॥ 4 ॥

उत्फुल्ल पद्म पत्राक्षं नीलजीमूत सन्निभम्।
यादवानां शिरोरत्नं कृष्णं वन्दे जगद्गुरुम् ॥ 5 ॥

रुक्मिणी केळिसंयुक्तं पीताम्बर सुशोभितम्।
अवाप्त तुलसीगन्धं कृष्णं वन्दे जगद्गुरुम् ॥ 6 ॥

गोपिकानां कुचद्वन्द्व कुङ्कुमाङ्कित वक्षसम्।
श्रीनिकेतं महेष्वासं कृष्णं वन्दे जगद्गुरुम् ॥ 7 ॥

श्रीवत्साङ्कं महोरस्कं वनमाला विराजितम्।
शङ्ख चक्रधरं देवं कृष्णं वन्दे जगद्गुरुम् ॥ 8 ॥

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत्।
कोटि जन्म कृतं पापं स्मरणेन विनश्यति ॥ 9 ॥

॥ इति श्रीकृष्णाष्टकं समाप्तम् ॥